**E-ISSN-2584-2870** **DOI: https://doi.org/10.65833/dbs.2026.021**

देवभूमि-सौरभम्
Devabhūmisaurabham

**Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India**

# काव्यशास्त्रीयनायिकालक्षणदृष्ट्या श्रीमद्रामायणोक्तसीताचरित्रस्य विमर्शः

**चन्दनमहान्ती**
**शोधच्छात्रः**
**केन्द्रीय-संस्कृत-विश्वविद्यालयः**
**शोधकेन्द्रम् – श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालयः, कलकाता**
**दूरभाषसंख्या -7029344812**
**अणुवाक्संख्या – chandanmahanti66@gmail.com**

## शोधसारः

*उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम्।*

*सर्वश्रेयस्करीं सीतां नतोऽहं रामवल्लभाम्।। (रा. मा. - बा. काण्ड. ५)*

*संस्कृतसाहित्यस्य आदिकाव्यरूपेण जगति प्रख्यातमानमादिकविना वाल्मीकिना विरचितं श्रीमद्रामायणम्। सप्तकाण्डैः पुरुषोत्तमरामचन्द्रस्य चरित्रमुपन्यास्तमत्रैव विविधचरित्रैः सह। साहित्यशास्त्रैः सदैव भणितं 'रामादिवत् प्रवर्तितव्यमिति'। एतेषां चरित्राणां संज्ञानेन अवबोधेन च काव्यशास्त्राणां लक्ष्यं प्रति अनुगच्छतीति। अत्रैव आलोच्य विषयस्तु श्रीमत्याः जनकतनयायाः सीतायाः चरित्रं काव्यशास्त्रीयनायिकालक्षणदृष्ट्या। विषयवस्तुविश्लेषणविधिमधिकृत्य अत्रैव अध्ययनं भवति।*

*पुरुषोत्तमरामचन्द्रेण सह सदैव वर्णनं प्राप्यते मातुः सीतायाः श्रीमद्रामायणे। तथापि विषेशरूपेण बालकाण्डस्य ७३ सर्गे विवाहप्रसङ्गे, अयोध्याकाण्डस्य २६-३० सर्गेषु वनगमनप्रसङ्गे, अरण्यकाण्डस्य २७, ४८, ५३, 46 सर्गेषु , किष्किन◌्ध्याकाण्डे २८, ३० सर्गयोः, सुन्दरकाण्डे २२, ११७, ११८ सर्गेषु, युद्धकाण्डे ३२-३४, ८३, ११७-११९ सर्गेषु, उत्तरकाण्डे ५२-६०, १०९-११० सर्गेषु च रामवल्लभायाः वर्णनं प्राप्तमिति। आलोच्य विषयं दृष्ट्वा करुणरसोऽभिव्यञ्जितं वर्णनं सीतायाः चरित्रन्तु शास्त्रोक्तेषु पञ्चसतीषु अन्यतमम्। काव्यशास्त्रस्य लक्षणं दृष्ट्या स्वीयासु मुग्धाश्रेण्याः नायिका माता सीता। मुग्धानायिकायाः लक्षणप्रसङ्गे साहित्यदर्पणे कविराजेन प्रोक्तम् –*

*प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।*

*कथिता मृदुश्च माने समधिक-लज्जावती मुग्धा।। (सा. द. ३.७२)*

*वर्तमानेषु एव मातुः सीतायाः सादृशगुणैव अपेक्षते तदैव स्मृतिषु उक्तवाणीषु एव सार्थकता 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इति।*

***शब्दसंकेताः** – आदिकाव्यं, सीता, नायिका, स्वीया, रामवल्लभा इत्यादयः।*

**भूमिका** –श्रीमद्रामायणं च्यवनपुत्रेण आदिकविना विरचितम्। सप्तकाण्डैः पुरुषोत्तमरामचन्द्रस्य चरित्रमुपन्यास्तमत्रैव विविधचरित्रैः सह। साहित्यशास्त्रैः सदैव भणितं 'रामादिवत् प्रवर्तितव्यमिति[i]'। रामचन्द्रस्य वर्णनं तद्हेतोः काव्यकारैः यथार्थं कृतम्। काव्यं सदैव कान्तासम्मिततयोपदेशं प्रदत्तम्। पुरा आदिकविना वाल्मीकिना तमसातटे उपविश्य दृष्टं मातङ्गस्य शरेण कौञ्चक ्रौ मिथुनावस्थायां क ्रौञ्चः हतः। तद्दृष्टं हृदयस्थशोकः छन्दमयवाण्या उच्चारितः ऋषिणा[ii]। तदैव ऋषिः परिपप्रच्छ आगतं मुनिपुङ्गवं नारदम्। ब्रह्मणा प्ररितस्य नारदस्य उपदेशेन जगच्छ्रेष्टचरित्रस्य रामचन्द्रस्य वर्णनार्थं ऋषिः प्रेरितः। ऋषिणा वाल्मीकिना तदैव सप्तकाण्डैः चतुर्विंशतिसहस्रश्लोकैश्च श्रीमद्रामायणं नाम महाकाव्यं प्रणीतम्। जनसमाजप्ररितवाचा काव्यस्य माहात्म्यं जगति अधुना सुप्रसिद्धम्। विशेषतः अत्रैव आलोचितानि चरित्राणि तु – नायकः पुरुषोत्तमः रामचन्द्रः, नायिका जनकतनया सीता, प्रतिनायकस्तु दशाननः रावणः, अयोध्यापतिः दशरथः, दशरथात्मजाः कौशल्या, कैकेयी, सुमित्रा च, रामचन्द्रस्य छायसमाः भ्रातरः लक्षणः, भरतः, शत्रुघन्नश्च, तेषाम् आत्मजाः उर्मिला, माण्डवी, शुतकर्णी च, अन्तपुरसेविका मन्थरा, निषादराजः, पक्षीराजः जटायुः, किष्किन्ध्यायाः वानरराजः सुग्रीवः, तेषाम् सहचराः जाम्मुबान्, पवनपुत्रः हनुमान्, सुषेणः, नलः,नीलादयः, रावणस्य पत्नी मन्दोदरी, पुत्रः इन्द्रजित्, इन्द्रजित् पत्नी प्रमिला, रावणस्य भ्रातरौ विभीषणकुम्भोकर्णौ, प्रभृतयः रावणानुचराः, रामचन्द्रस्य पुत्रौ लवकुशौ चेति। मुख्यतः तेषु चरित्रेषु अत्रैव आलोच्य विषयस्तु सीताचरित्रस्य नायिकागुणदृष्ट्या विमर्शः।

**रामायणोपजीव्यकाव्येषु सीता** –संस्कृतसाहित्यं परिवर्धितं प्रायशः रामायणमहाभारतयोः आख्यानोपाख्यानवृत्तमधिकृत्य एव। तथापि रामायणोत्तरकाले संस्कृतसाहित्ये रामायणस्य प्रभावः क्रमानुसारेण दरीदृश्यते। रामायणमधिकृत्य साहित्यस्य संख्या अनेका। विशेषतः सीतारामयोः चरित्रमधिकृत्य साहित्यानि एव प्राप्यन्ते, इतोऽपि केवलमात्रं सीतादेव्याः चरित्रमनुदृश्य अपि साहित्यानि वर्तन्ते ताभिः कविभिः रचितानि– महाकाव्यानि, लघुकाव्यानि, चम्पूकाव्यानि, रूपकाणि चेति। यद्यथा -

**महाकाव्यानि**– कुमारदास जानकीहरणं, चक्रकविना जानकीपरिणयं, डॉ. रेवाप्रसादद्विवेदिना कृतं सीताचरितम्, अभिराजराजेन्द्रमिश्रेण जानकीजीवनं, सूर्यनाराणयाध्वरिकृतं सीतापरिणयं चादिषु महाकाव्येषु सीताचरित्रं समलङ्कृतम्।

**लघुकाव्यानि**– दधिभूषणकाव्यतीर्थेन कृतं सीतापरिणयं, श्रीनिवासाचार्येण कृतं जानकीचरणचामरं, जयदेवेन कृतः सीताविहारः चादिषु लघुकाव्येषु सीताचरित्रं समलङ्कृतम्।

**चम्पूकाव्यानि**– रामस्वामिना कृतं सीताचम्पूकाव्ये सीताचरित्रं समलङ्कृतम्।

**रूपकाणि**– भासेन कृता प्रतिमा, रामभद्रदीक्षितेन कृतं जानकीपरिणयं, हरिदाससिद्धान्तवागीशेन कृतं जानकीविक्रमं चादिषु रूपकेषु सीताचरित्रं समलङ्कृतम्।

इतरभाषाभिः रामायणस्य महती चर्चा जाता। सन्तकविना तुलसीदासेन रचितः रामचरितमानसः, कृत्तिवास-औझाकृतं बांलारामायणं, कम्बरामायणञ्चेति प्रसिद्धं जगति। अत्रत्वे सीताचरित्रस्य महती आलोचना विहिता। इतोऽपि सीतोपनिषद्, अद्भुतरामायणादिषु सीताचरित्रस्य केन्द्रं कृत्वा आलोचना विहिता।

**अध्ययनस्योद्देश्यानि**–प्रत्येकस्मिन् कार्ययेव उद्देश्यमावश्यकम्। शोधकार्यमेकम् महत्कार्यम्।'उद्देश्यं विना प्रमत्तोऽपि न कार्ये प्रवर्तते' तर्हि शोधार्थिनः शोधकार्ये अवश्यमेव उद्देश्यं वर्तते। यद्यथा अध्ययनेऽस्मिन् उद्देश्यानि –

- श्रीमद्रामायणोक्तसीताचरित्रस्य**नायिकागुणदृष्ट्या**अनुशीलनम्।
- श्रीमद्रामायणोक्तसीताचरित्रस्य**काव्यशास्त्रीयनायिकायाः लक्षणदृष्ट्या** परिशीलनम्।

**शोधविधिः** –प्रस्तुताध्ययनस्य प्रकृतिः वर्णनात्मकी वर्तते अध्ययनमिदं वर्णनात्मकं विराजते। वर्णनात्मकञ्च अध्ययनम् ,अप्रयोगात्मकस्य गुणात्मकशोधे अन्तर्भवति। अतः इदं गुणात्मकं वर्णात्मकमनुसन्धानं वर्तते। गुणात्मकमध्ययनं कर्तुं विषयवस्तुविश्लेषणविधिः अत्यन्तमुपयोगी भवति। अतः प्रस्तुतेऽस्मिन्नध्ययने विषयवस्तुविश्लेषणविधिः प्रयुक्तः।

**काव्यशास्त्रीयनायिकालक्षणदृष्ट्या श्रीमद्रामायणोक्तसीताचरित्रस्य विमर्शः** – महाकाव्यत्वदृष्ट्या महाकाव्यस्य नायकनायिकाप्रतिनायकाश्च भवेयुः यद्विहाय कथं काव्यत्वम्। श्रीमद्रामायणस्य नायकः पुरुषोत्तमः रामचन्द्रः, नायिका तु जनकतनया देवी सीता, प्रतिनायकः दशाननः रावणश्च। करुणरसेन अभिव्यञ्जितकाव्यं संस्कृतसाहित्यस्य कालजयीत्वगुणत्रयस्य प्रतीकस्वरूपं महाकाव्यमिदम्। सामाजिकपक्षः, मनोवैज्ञानिकपक्षः, आध्यत्मिकपक्षश्चेति आर्षकाव्यत्वेन परिलक्ष्यन्ते। परन्तु काव्यशास्त्रदृष्ट्या चरित्राणां वर्णनादिभिः आदिकविना कथं चिन्तितमितोऽपि ध्येयम्। आलोच्य विषयस्तु देवी सीता नायिकालक्षणपेतं कथं नायिका। पुरुषोत्तमरामचन्द्रेण सह सदैव वर्णनं प्राप्यते मातुः सीतायाः श्रीमद्रामायणे। तथापि विशेषरूपेण बालकाण्डस्य ७३ सर्गे विवाहप्रसङ्गे रामचन्द्रं प्रति अनुरागः परिदृश्यते सीतायाः। बालकाण्डस्य अन्तिमतमे सर्गे तदर्थम् आदिकविना वाल्मीकिना प्रोक्तमिति विषयेऽस्मिन् भर्तुः रामचन्द्रस्य हृदयस्थवार्ता मनसा ज्ञाता सदैव सीता –

तया स राजर्षिसुतोऽभिकामया

समेयिवानुत्तमराजकन्यया।

अतीव रामः शुशुभे मुदान्वितो

विभुः श्रिया विष्णुरिवामरेश्वरः[iii]॥

अयोध्याकाण्डस्य वनगमनप्रसङ्गे पुरुषोत्तमरामचन्द्रेण सह वनगमने आदेशलाभार्थं, तेन सह सम्भाषणे सीता पतिव्रतागुणस्य परिचयः दीयते –

न पिता नात्मजो नात्मा न माता न सखीजनः।

इह प्रेत्ये च नारीणां पतिरेको गतिः सदा[iv]॥

इतोऽपि रामचन्द्रेण सह वनगमने प्रार्थनाप्रत्याख्याने रामचन्द्रं प्रति देवी सीता उवाच –

इह लोके च पितृभिर्या स्त्री यस्य महावल।

अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा॥

एवमस्मात् स्वकां नारीं सुवृत्तां हि पतिव्रताम्।

नाभिरोचयसे नेतुं त्वं मां केनेह हेतुना[v]॥

अर्थात् देवी सीता अत्रैव वनवासं सगमनार्थं प्रतिव्रताधर्मस्य विषये आह – भवद्दुःखे समदुःखी भूत्वा पतिव्रताधर्मस्य पालयामीति।

, अरण्यकाण्डस्य ४८ तमे सर्गे सीतादेव्यै रावणस्य प्रलोभनप्रसङ्गे प्रलोभनात् परं रावणः प्रत्याख्यितवान् तदैव हरणोद्दतरावणं प्रति देवी सीता आह–

अपहृत्य शचीं भार्य्यां शक्यमिन्द्रस्य जीवितुम्।

नहि रामस्य भार्य्यां मामानीय स्वस्तिमान् भवेत्vi॥

स्वीयं भर्तारं प्रति अनुरक्तभाव अत्रैव प्रस्फुटयतेसीतादेव्याः। अनन्तरं ५३ तमे सर्गे रावणं प्रति क्रोधप्रकाशप्रसङ्गे स्वीयपतेः कथं विश्वसीति, एकात्मात्वबोधोऽपि आलोचनाप्रसङ्गे परिदृश्यते विविधैः श्लोकैः। अरण्यकाणडस्य४6 तमे सर्गेऽपि रावणं प्रति भर्त्सनाप्रसङ्गे स्वीयपतेः गुणवर्णनं, कथमनुसन्धानं कृत्वा रावणवधमपि करिष्यतीति तां (सीतां) प्रति कथं रामचन्द्रस्य प्रेम अस्ति प्रसङ्गेऽस्मिन् रामचन्द्रस्य कृते सीतायाः विश्वासः प्रतीयते।, किष्किन्ध्याकाण्डे २८, ३० सर्गयोः रामचन्द्रेण सीतायै विलापं कृतं प्रसङगेऽस्मिन् सीतां प्रति रामचन्द्रस्य समप्रेम परिदृश्यते।सुन्दरकाण्डे ५६ तमे सर्गे हनुमता सह सीतादेव्याः सम्भाषणे पतिं प्रति अनुरक्तभावः, चिन्ताभावः, कुशलज्ञानार्थं कातरभावः परिदृश्यते अत्रैव नायिकायाः काव्यशास्त्रदृष्ट्या नायिकागुणं समलंकृतम्।युद्धकाण्डेऽपि ३२-३४, ८३, ११७-११९ इत्यादिषु सर्गेषु रावणकर्तृकं देवीसीतायै प्रलोभनं, भयप्रदर्शनं, अपमानादयः प्रदर्श्यन्ते परन्तु सीताद्वारा किञ्चिदपि पतिरामचन्द्रं प्रति सम्मानप्रदर्शनम् एकनिविष्ठतादयः नहि पराभूताः इति तु स्त्रीधर्मस्य प्रतीकस्वरूपम्। अपि च अग्निपरीक्षाप्रसङ्गेऽपि किञ्चिदपि न पराकुण्ठा जाता माता सीता तत्रैव सतीत्वस्य परिचयोऽपि दीयते अग्निपरीक्षया। उत्तरकाण्डे ५२-६० तमयोः सर्गयोः सीतावर्ज्जनार्थम् आलोचना विहिता तत्रैव सीतायाः अत्यन्तदुःखीभावस्य प्रसङ्गः परिदृश्यते दुःखी भूत्वा अपि सीता पतिं रामचन्द्रं प्रति किमपि न उवाद अत्रैव पतिभक्तेः परिचयः प्राप्यते।१०९-११० सर्गे परन्तु पुनः अग्निपरीक्षाप्रसङ्गे अन्तिमे सीतायाः चरित्रे अभिमानः परिलक्ष्यते, रामचन्द्रस्योपरि क्षोधोऽपि जातः सीतायाःएवञ्च पातालप्रवेशस्य वर्णनं प्राप्यते। नायकरामचन्द्रेण सह नायिकायाः जनकतनयायाः प्रेमसम्पर्कस्य चित्रं वर्त्तते महाकाव्येऽस्मिन् प्रायशः सर्वत्रैव देवी सीता पतिं रामचन्द्रं प्रति पतिव्रता, पत्यनुरक्ता, पतिकातरा, सतीभावा, विश्वासिनी, चादीनां गुणानां वर्णनं प्रतिदृश्यते।

अत्रैव यादृशं गुणं सीताचरित्रस्य वर्णीयते तादृशं तु स्वायीनायिकायाः प्रसङ्गे धनञ्जयेन दशरूपके प्रोक्तमिति -

मुग्धा मध्या प्रगल्भेति स्वीया शीलार्जवादियुक्vii।

अर्थात् शीललज्जायुक्ता नायिका तु स्वीया। महाकाव्येऽस्मिन् वर्णितं सीताचरितं परमशीलाचरित्रम्।

इतोऽपि रामचन्द्रेण स्वस्य नाट्यदर्पणे स्वीयानायिकाप्रसङ्गे प्रोक्तम् –

लज्जावती मृदुर्धीरा गम्भीरा स्मितहासिनी विनीता कुलजा दक्षा वत्सला योषिदुत्तमाviii।

अर्थात्, मृदुधीरा, गम्भीरा, स्वमितहासिनी, विनीता, कुलजा, कर्मदक्षा, पतिवत्सला च अत्रैव नायिका सीता तु एतादृशी।

साहित्यदर्पणेऽपि तृतीयपरिच्छेदे विश्वनाथकविराजेन प्रोक्तं स्वीया नायिकाविषये -

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीयाix।

अर्थात् शीलयुक्ता, विनया, गृहकर्मपरा, पतिव्रता च नायिका स्वीया, अतः देवी सीता पतिव्रतागुणेन समालङ्कृता। विश्लेष्य अन्विष्य च श्रीमद्रामायणोक्तसीताचरित्रं नायिकालक्षणदृष्ट्या स्वीया नायिका। परन्तु स्वीयानायिकायाः भेदत्रयं वर्त्तते यद्यथा – मुग्धा, मध्या, प्रगल्भा चेति। आलोच्य इति मन्ये भेदत्रयस्य मध्ये उक्तसीताचरित्रं दृष्ट्वा मुग्धा नायिका जनकतनया सीता। मुग्धानायिकायाः लक्षणप्रसङ्गे साहित्यदर्पणे विश्वनाथकविराजेन उक्तम् –

प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।

कथिता मृदुश्च माने समधिक-लज्जावती मुग्धाx॥

**निष्कर्षः**–परिशेषे उक्तं यत् संस्कृतसाहित्यस्य आर्षकाव्यम् आदिकाव्यं महाकाव्यं च श्रीमद्रामायणम्। अत्रैव पुरुषोत्तमेन रामचन्द्रेण सह मातुः सीतायाः आलोचना सदैव विहिता। विविधैः गुणैः सीताचरित्रस्य यादृशं वर्णनं कृतम् आदिकविना अद्यत्वे समाजेऽस्मिन् तादृशं चरित्रं विरलम्। परन्तु सीतां प्रति वाल्मीकिरामायणे वारं वारं सतीत्वस्य प्रश्नजातमिति तु समाजे चीरदुःखिनी चरित्रा सीता, जन्मजातदुःखिनी सीता इति प्रभावः वर्तते। तदर्थं परवर्तिनः कवयः सीताचरित्रस्य वर्णनं बहुसावधानेन कृतम्। यतो हि परिदृश्यते भवभूतेः उत्तररामचरिते, राजशेखरस्य बालरामायणे, अपि च अर्वाचीनकविभिः अपि कृतं यद्यथा - डॉ. रेवाप्रसादद्विवेदिनः सीताचरिते, अभिराजराजेन्द्रमिश्रस्य जानकीजीवने च मातुः सीतायाः चरित्रस्य वर्णनं नारीवादस्य पक्षे कृतमिति। परन्तु श्रीमद्रामायणोक्तसीता नायिकागुणेन स्वीया इति समर्थितमिति शम्।

## सन्दर्भग्रन्थसूची –


- उपाध्याय, के. (1992). रामायण की सांस्कृतिक पृष्ठभूमि. लखनऊ: ज्ञानमंडल लिमिटेड.
- कोण्डी, ड. च. (२०१८). कविसृष्टिः. शङ्करपुरं, शृङ्गेरी: शारदाम्बाप्रकाशनम्.
- तिवारी, जि. (2008). रामायण का दार्शनिक अध्ययन. जयपुर: ऐसियन पब्लिशर्स.
- मुखोपाध्याय. ड. गो. (२०१२). संस्कृत साहित्येर इतिवृत्त. कलेज रो, कलकाता-९: इउनाइटेड वुक एजेन्सि.
- मुखोपाध्याय, ड. व. (२०१३).विश्वनाथ कविराजकृतःसाहित्यदर्पणः. ३८, विधानसरणी,कलकाता -७००००६: देवाशिषभट्टाचार्य्यः, संस्कृत-पुस्तक-भाण्डार.
- वन्द्योपाध्याय,डि.(१९८८). संस्कृतसाहित्येर इतिहास (बांला). आर्य भ्यानसन ७०००५६- कलकाता (नवमतल): पश्चिमबङ्ग-राज्य-पर्षद्-पुस्तक.
- शील. श्री.अ.(२०१७). बाल्मीकि-विरचितं रामायणम्. कलकाता-१: वेणीमाधवशीलस् लाइब्रेरी.
- शास्त्री, ह. प्र. (1975). रामायण का इतिहास और परम्परा. वाराणसी: नागरी प्रचारिणी सभा.
- शर्मा, एस. (2010). रामायण: पाठ, परम्परा और व्याख्या. दिल्ली: साहित्य अकादमी.
- सिंह, एच. (2001). वाल्मीकि रामायण का साहित्यिक एवं सांस्कृतिक अध्ययन. नई दिल्ली: साहित्य भवन.


## अन्तर्जालिकसंकेतसूची–


- Valmiki Ramayana: Developed and Maintained by IIT Kanpur:

https://www.valmiki.iitk.ac.in/sloka?field_kanda_tid=1&language=dv&field_sarga_value=2


## पादटीका -

[i]साहित्यदर्पणः – प्रथमपरिच्छेदः- २.

[ii]बाल्मीकिकृतं रामायणम् – बालकाण्डः – २/४०.

[iii]बाल्मीकिकृतं रामायणम् – बालकाण्डः – ७७/२९.

[iv]बाल्मीकिकृतं रामायणम् – अयोध्याकाण्डः – २७/६.

[v] बाल्मीकिकृतं रामायणम् – अयोध्याकाण्डः – २९/१८-१९.

[vi]बाल्मीकिकृतं रामायणम् – अरण्यकाण्डः – ४८/२३.

[vii]*दशरूपकः* -२-१५.

[viii]*नाट्यदर्पणः*- १५९.

[ix]*साहित्यदर्पणः* -३/७०.

[x]*साहित्यदर्पणः* -३/७२.